वार्षिक–पाठ्यक्रमः  कक्षा –षष्ठी

सत्रम्– **2025-26**      विषयः–संस्कृतम्

| **पाठ्यवस्तु** | **सहायकशैक्षिक–अनुदेशाः** | **अधिगमोद्देश्यानि** | **अधिगमसम्प्राप्तयः** | **गतिविधयः** |
| --- | --- | --- | --- | --- |
| १. प्रथमः पाठः<br>वयं वर्णमालां पठामः | (१) स्वराः– ह्रस्वदीर्घस्वराणां परिचयः।<br>(२) व्यञ्जनानि– कारभ्य हकारपर्यन्तं वर्णबोधः।<br>गुणिताक्षराणाम् अभ्यासः।<br>वर्णसंयोजन–वर्णवियोजनविधिना संयुक्तवर्णयुक्तशब्दानामभ्यासः।<br>आत्मपरिचयः | सम्यग् वर्णमालां जानन्ति।<br>वर्णसंयोजने वर्णविच्छेदे छात्राणां निपुणत्वं विधास्यति।<br>नामविधिना आत्मपरिचयं कथयिष्यन्ति। | वर्णमालायां दक्षाः भवन्ति।<br>सुष्ठु शब्दनिर्माणविधिं जानन्ति।<br>स्वनामपरिचयं संस्कृतेन वक्तुं समर्थाः भवन्ति। | वर्णमालागीतम्-1 यूट्यूब–सहायतया शिक्षणीयम्। अ, आ इ, ई, उ, ऊ, ऋ .......<br>वर्णमालागीतम्-2 यूट्यूब–सहायतया शिक्षणीयम्। कमलं विकसति सुन्दर–सरसि.....<br>परस्परं नाम प्रश्नमाध्यमेन आत्मपरिचयं दास्यन्ति। |
| २. द्वितीयः पाठः<br>एषः कः ? एषा का ? एतत् किम् ? | पुल्लिङ–स्त्रीलिङ–नपुंसकलिङपरिचयः<br>एतत्, तत्, किम् एतेषां प्रथमाविभक्तौ त्रिषु लिङ्गेषु त्रिषु वचनेषु च अभ्यासः।<br>अभिनयमाध्यमेन सर्वनामपरिचयः। | संज्ञासर्वनामशब्दानां परिचयं प्रददाति।<br>लिङ्गस्य सामान्यपरिचयं जानन्ति<br>वाक्यनिर्माणं जानाति।<br>धातुरूपाणि प्रथमपुरुषस्य त्रिषु | पुल्लिङ्ग स्त्रीलिङ्ग–नपुंसकलिङ्गपरिचयं प्राप्नुवन्ति।<br>सर्वनामशब्दान् जानन्ति।<br>संज्ञा–सर्वनामशब्दानाम् पृथक्करणे नैपुण्यं | • अकारान्त–आकारान्ताः विविध धातुरूपाणां बोधनाय विविधक्रियानां गतिविधिमाध्यमेन बोधः कारयिष्यति।<br>• पुल्लिङ्ग–स्त्रीलिङ्ग–नपुंसकलिङ्ग शब्दान् छात्राः जानीयुः, एतदर्थं शिक्षकः गतिविध्याधारितं शिक्षणं कुर्यात् |

| | | | | |
|---|---|---|---|---|
| | क्रियापदपरिचयः - लट्लकारे प्रथमपुरुषस्य त्रिषु वचनेषु अभ्यासः। | वचनेषु जानन्ति। | प्राप्नुवन्ति । | |
| ३. तृतीयः पाठः<br>अहं च त्वं च | मध्यम–उत्तमपुरुषयोः त्रिषु वचनेषु अभ्यासः।<br>‘अस्’ धातोः लट्लकारे सम्पूर्णं रूपं जानाति। | त्रिषु लिङ्गेषु समानरुपेण संक्षिप्तवाक्यरचनां जानन्ति। | मध्यमोत्तमपुरुषयोः प्रयोगं जानन्ति। | प्रश्नविधिना ‘भवान्, भवती’ इत्यनेन सह मध्यमोत्तमपुरुषयोः अभ्यासं कुर्वन्ति।<br>मम परिचयः’ इति विषये मम नाम ----। भवतः/ भवत्याः/ विद्यालयस्य/निवासस्थानस्य/जनकस्य नाम इत्यादीनि वाक्यानि वदेयुः। |
| ४. चतुर्थः पाठः<br>अहं प्रातः उत्तिष्ठामि | दिनचर्याकथनमाध्यमेन उत्तमपुरुषस्य अभ्यासः।<br>समयशिक्षणम्। (पूर्ण–ऊन–सार्ध–सपादम्) | उत्तमपुरुषं जानन्ति।<br>समयेन परिचिताः भवन्ति | भाषायां समयं कथयन्ति। | घटिकानिर्माण–गतिविधिः। |
| ५. पञ्चमः पाठः<br>शूराः वयं धीराः वयम् | गीतविधिना उत्तमपुरुषे सरलवाक्यरचनां कुर्वन्ति | सर्वनामशब्दैः सह उत्तमपुरुषस्य बहुवचनं जानन्ति। | वाचनकौशलेन भाषायाम् अभिव्यक्तिं कुर्वन्ति । | क्रीडाङ्गणे गत्वा प्रकृत्यादिकं कमप्येकं विषयमाधृत्य छात्राः एकम्– एकं वाक्यं रचयित्वा वदेयुः। |
| ६. षष्ठः पाठः<br>सः एव महान् चित्रकारः | वर्णपरिचयः<br>पुष्पाणां नामानि | वर्णपरिचयं जानन्ति | वर्णज्ञाने समर्थाः भवन्ति। | कस्मै कः वर्णः रोचते? इत्यादिमाध्यमेन आरभ्य दैनन्दिनजीवने प्रयुक्त– वर्णाधारित–गतिविधिः। |

| | | | | |
|---|---|---|---|---|
| ७. सप्तमः पाठः अतिथिदेवो भव | अव्ययपरिचयः | येषां रूपाणि न चलन्ति तानि अव्ययानि भवन्ति, तेषां परिचयं प्राप्नुवन्ति। | रोचककथामाध्यमेन छात्राः अव्ययशब्दान् जानन्ति। गद्यविधायां पठनकौशलं च प्राप्नुवन्ति। | समूहगतिविधिः घटे अव्ययानां चिटिकाः संस्थाप्य यस्य अव्ययस्य चिटिका यस्य पार्श्वे आगच्छति सः तम् अव्ययं स्वीकृत्य वाक्यं कथयति, यः वाक्यनिर्माणे असमर्थः सः समूहात् बहिर्भवति, तस्य अव्ययं स्वीकृत्य समीवर्ति अन्यः बालः वाक्यं कथयति। |

**पाठ्यक्रमः 6 सितम्बर 2025 पर्यन्तं पूर्णं कारणीयम् ।**

**मध्यावधिः पाठ्यक्रमस्य पुनरावृत्तिः ।**

**मध्यावधि-परीक्षा**

| **पाठपरिचयः** | **विषयवस्तु** | **अधिगम–उद्देश्यानि** | **अधिगमसम्प्राप्तिः** | **गतिविधयः** |
|---|---|---|---|---|
| ८. अष्टमः पाठः बुद्धिः सर्वार्थसाधिका | क्रियापदपरिचयः–खेल्, पठ्,पिब्, खाद्, गच्छ्, धाव्, भू, हस् इत्यादीनां धातूनां लट्लकारे अभ्यासः। | वाक्ये क्रियापदप्रयोगे समर्थाः भवेयुः। | क्रियापदानां परिज्ञाने समर्थाः भवन्ति। | क्रियापदानां कथनस्य स्पर्धां कारयतु। |
| ९. नवमः पाठः यो जानाति सः पण्डितः | प्रहेलिकायाः माध्यमेन तार्किकक्षमतायाः विकासः। | शब्दानां षष्ठीविभक्तौ त्रिषु लिङ्गेषु प्रयोगे समर्थाः भवेयुः। | षष्ठीविभक्त्या परिचिताः भवन्ति। | गतिविधिद्वारा श्लोकानां स्मरणं करिष्यन्ति। स्फोरकपत्रमाध्यमेन सम्बन्धानाम् अभ्यासः कारणीयः। |
| १०. दशमः पाठः त्वम् आपणं गच्छ | क्रियापदानां लोट्लकारे अभ्यासः। कथायाः रसास्वादं कुर्वन्ति। | लोट्लकारस्य रूपाणि ज्ञात्वा वाक्ये प्रयोगं कुर्युः। | लोट्लकारेण परिचिताः भवन्ति। | लोट्लकारे वाक्यप्रयोगः परिवर्तनाभ्यासश्च यथा - पठति-पठतु। वदसि-वद । चलामि-चलानि। |

| | | | | |
|---|---|---|---|---|
| | | | | एवमेव अन्यवाक्यानाम् अभ्यासः कारणीयः। |
| ११. एकादशः पाठः पृथिव्यां त्रीणि रत्नानि | अभिनयपूर्वकं सस्वरगायनम्। कण्ठस्थीकरणम्, अन्वयादिमाध्यमेन अर्थबोधः | पद्यविधायां पठनकौशलं च जानीयुः। | पद्यगायने समर्थाः भवन्ति। | पद्यस्पर्धां द्वारा श्लोकान् गास्यन्ति, श्लोकान् स्मरिष्यन्ति च । |
| १२. द्वादशः पाठः आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः | द्वितीयाविभक्तेः परिचयः। | छात्राः तार्किकचिन्तने क्षमाः भवेयुः। समस्यासमाधान–कौशले दक्षाः भवेयुः। छात्राः द्वितीयाविभक्तेः सामान्यप्रयोगे दक्षाः भवेयुः। | समस्यासमाधानकौशले दक्षाः भवन्ति। तार्किक–चिन्तने दक्षाः भवन्ति। | शिक्षकः समस्यासमाधानकौशलम् आधृत्य गतिविधिमेकं सम्पादयेत्। यथा– पठनान्तरं बाला किं करिष्यन्ति? सर्वे बालाः स्वमन्तव्यं बोधयन्तु। गतिविधिः–२ शिक्षकः छात्रैः सह मिलित्वा द्वितीया–विभक्ति–आधारितं कमपि गतिविधिं सम्पादयेयुः। |
| १३. त्रयोदशः पाठः सङ्ख्यागणना ननु सरला | गीत–माध्यमेन संख्याशिक्षणम्। एकतः पञ्चाशत् पर्यन्तं संख्याबोधः अङ्कतः शब्देषु संख्याज्ञानम्। | संख्यां जानीयुः। | संख्यां जानन्ति। | संख्यागीतम् यूट्यूब–सहायतया शिक्षणीयम्, एकम् एकम् आगच्छ–२। द्वे–द्वे स्वागतम्–२। त्रीणि–त्रीणि उपविश–२। चत्वारि–चत्वारि कुशलं किम्?–२ पञ्च–पञ्च कः विशेषः?–२ षड्–षड् कृपया वद–२ सप्त–सप्त दुग्धं पिब–२ अष्ट– अष्ट पुनर्मिलाम–२ नव–नव नमस्ते–२ दश–दश ओम्–ओम्–२ ॥ |

| | | | | |
|---|---|---|---|---|
| १४. चतुर्दशः पाठः माधवस्य प्रियम् अङ्गम् | तृतीयाविभक्तेः परिचयः।<br>अङ्गपरिचयः | तृतीयाविभक्तेः प्रयोगं जानीयुः। | तृतीयाविभक्तेः प्रयोगं जानन्ति। | शिक्षकः छात्रैः सह मिलित्वा तृतीया–विभक्ति–आधारितं कमपि गतिविधिं सम्पादयेयुः। |
| १५. पञ्चदशः पाठः वृक्षाः सत्पुरुषाः इव | पद्यपरिचयः | पद्यपरिचयं प्राप्नुयुः। | पद्यपरिचयं प्राप्नुवन्ति। | पद्याधारित–चित्ररचना प्रतिस्पर्धां कारयेयुः। |

- **पाठ्यक्रमः 31जनवरी 2026 पर्यन्तं पूर्णं कारणीयम् ।**
- **वार्षिकपरीक्षादृष्ट्या सकलपाठ्यक्रमस्य पुनरावृत्तिः।**
- **वार्षिकमूल्याङ्कनं सकलपाठ्यक्रमात् भविष्यति।**

**वार्षिक-परीक्षा**